# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०९५



पञ्चनवतितमः सर्गः ९५

शिखिध्वज उवाच ।

आब्रह्मस्तम्बपर्यन्तं यद्ययं भासते भ्रमः ।

अर्थक्रियासमर्थश्च तत्कथं दुःखकारणम् ।। १

कुम्भ उवाच ।

एवं जगद्भ्रमस्यास्य भावनं तावदाततम् ।

शिलीभूतस्य शीतेन सलिलस्येव रूक्षता ।। २

अज्ञानं शिथिलीभूतमेवं नष्टं विदुर्बुधाः ।

न नाशेन विनोदेति पूर्वसंस्थानविच्युतिः ।। ३

तनुत्वं सर्वबोधस्य यत्तदेव हि कारणम् ।

सर्गोपशमसंपत्तौ प्रतिपन्ने परे पदे ।। ४

तानवं दृश्यते यस्य तस्यानुक्रमतः स्वयम् ।

पूर्वसंस्थानविगमात्प्रशमोऽप्युपपद्यते ।। ५

अनेनैव क्रमेणैवं त्वमादिपुरुषो नृपः ।

भ्रमाकारोदयं विद्धि मृगतृष्णाम्बुवत्स्थितम् ।। ६

एषा पितामहाभावेऽप्यसती भूतसंततिः ।

न कदाचन तत्सिद्धं यदसिद्धेन साध्यते ।। ७

अयं भूतोपलम्भो हि मृगतृष्णाम्ब्विवोदितः ।

विचाराद्विलयं याति शुक्तौ रजतधीरिव ।। ८

कारणाभावतः कार्यमभूत्वा भवतीति यत् ।

मिथ्याज्ञानादृते तस्य न रूपमुपपद्यते ।। ९

मिथ्यादृष्टिप्रेक्षितं तु न कदाचन विद्यते ।

मृगतृष्णाम्भसा केन घटकाः परिपूरिताः ।। १०

शिखिध्वज उवाच ।

स्रष्टुराद्यस्य परमं ब्रह्म कस्मान्न कारणम् ।

अनन्तमजमव्यक्तमम्बरं शान्तमच्युतम् ।। १२

कुम्भ उवाच ।

हेतुत्वाभावतो ब्रह्म कार्यत्वाभावतस्तथा ।

अद्वैतेनातिगन्तात्मा न च कार्यं न कारणम् ।। १२

अकर्तृकर्मकरणमकारणमबीजकम् ।

अप्रतर्क्यमविज्ञेयं ब्रह्म कर्तृ कथं भवेत् ।। १३

अकारणत्वात्कार्यत्वरहितं तज्जगद्भवेत् ।

अद्वैतैक्यमनाद्यन्तं तदाद्यमुपलम्भनम् ।। १४

अप्रतर्क्यमविज्ञेयं यच्छिवं शान्तमव्ययम् ।

तत्कथं कस्य केनैव कर्तृ भोक्तृ कदा भवेत् ।। १५

अतो नेदं कृतं किंचिज्जगदादि न विद्यते ।

न कर्तासि न भोक्तासि सर्वं शान्तमजं शिवम् ।।१६

कारणाभावतः कार्यं न कस्यचिदिदं जगत् ।

अकारणत्वात्कार्यत्वं भ्रमाद्विद्धि त्विदं जगत् ।। १७

अकार्यत्वाच्च नास्त्येतत्सर्ग इत्थं न विद्यते ।

यदा न कस्यचित्कार्यं कारणस्य जगत्तदा ।। १८

पदार्थाभावसंसिद्धिस्तत्सिद्धौ कस्य वेदनम् ।

एवं तु वेदनाभावे नास्त्यहंत्वस्य कारणम् ।। १९

अतः शुद्धो विमुक्तोऽसि कैवोक्तिर्बन्धमोक्षयोः ।

शिखिध्वज उवाच ।

बुद्धोऽस्मि भगवन्युक्तियुक्तमुक्तं त्वयोत्तमम् ।। २०

कारणाभावतः कर्तृ नेदं ब्रह्मेति वेद्म्यहम् ।

कर्त्रभावाज्जगन्नास्ति तेन नास्ति पदार्थदृक् ।। २१

नातश्चित्तादि तद्बीजं नातोऽहंतादि किंचन ।

एवंस्थिते विशुद्धोऽस्मि विबुद्धोस्मि शिवोस्मि वा । २२

नमो मह्यं परं चेत्यं न किंचिदिति बोधितः ।

पदार्थवेदनादित्थमसदेवावभासते ।

अहमाद्यन्तमेतेन शान्तमासे खकोशवत् ।। २३

जगत्पदार्थप्रविभागदृष्टिः

सदेशदिक्कालकलाक्रियौघा ।

अहो तु कालेन चिरेण शान्ता

ब्रह्मैव शान्तं स्थितमव्ययात्म ।। २४

शाम्यामि निर्वामि परिस्थितोऽस्मि

न यामि नोदेमि न चास्तमेमि ।

तिष्ठामि तिष्ठ स्वयथास्थितात्मा

शिवं शुभं पावनमौनमस्मि ।। २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० चू० शिखिध्वजविश्रान्तिर्नाम

पञ्चनवतितमः सर्गः ।।९५।।